"तुलां यदारोहति दन्तवाससा" कुमा० । [राजनि० ।

**दन्तवीज(क)** पु० दन्त इव वीजमस्य वा कप् । दाड़िमीवृक्षे

**दन्तवेष्ट** पु० सुश्रुतोक्ते दन्तरोगभेदे दन्तरोगशब्दे दृश्यम् ।

**दन्तवैदर्भ** पु० सुश्रुतोक्ते दन्तरोगभेदे दन्तरोगशब्दे दृश्यम् ।

**दन्तशङ्कु** पु० "वडिशो दन्तशङ्कुश्चानताग्रे तीक्ष्णकण्टकप्रथम-यवपत्रमुखे" सुश्रुतोक्ते अस्त्रभेदे ।

**दन्तशठ** पु०दन्तान् शठति क्लेदयति शठ–अच् । १जम्बीरे २कपित्थे ३कर्मरङ्गे, ४नागरङ्गे च । ५चाङ्गेर्य्यां ६चुक्राम्लिकायां स्त्री० मेदिनि० ७अम्ले हेमच० ८क्षुद्राम्लिकायाम् स्त्री राजनि० ।

**दन्तशर्करा** स्त्री दन्तस्य शर्करेव । दन्तरोगभेदे दन्तरोगशब्दे दृश्यम् । [ख्याते चूर्णभेदे त्रिका० ।

**दन्तशाण** पु० दन्तस्य शाण इव चिक्कणताहेतुत्वात् (मिषि)

**दन्तशूल** न० दन्तस्य शूलमिव । दन्तवेदनायाम् । "शीर्षरोगेऽक्षिरोगे च दन्तशूले गलग्रहे" भा० शा०२०५ अ० ।

**दन्तशोफ** पु० दन्तस्य शोफ इव । दन्तार्बुदे (दाँतेर आव) राजनि० । [भागे मांसपिण्डे शब्दच० ।

**दन्तसिरा** स्त्री दन्तस्य सिरा यत्र । (मेड़े) ख्याते दन्ताधो-

**दन्तहर्ष** पु० सुश्रुतोक्ते दन्तरोगभेदे दन्तरोगशब्दे दृश्यम् ।

**दन्तहर्षक** पु०दन्तान् हर्षयति हृष–णिच्–ण्वुल् । जम्बीरे जटाधरः । [दन्ताग्रीय तद्भवादौ त्रि० ।

**दन्ताग्र** न० ६त० । दन्तस्याग्रे ततः गहा० भवादौ छ ।

**दन्ताघात** पु० दन्तानाहन्ति आ+हन–अण् उप० स० । १निम्बूके । भावे घञ् । २दन्तैराहनने राजनि० । "दन्ताघातविदारितारिरुधिरैः सिन्दूरशोभाकरम्" गणेशध्यानम् । रतौ तत्स्थानानि यथा "स्तनयोर्गण्डयोश्चैव ओष्ठे चैव तथाधरे । दन्ताघातः प्रकर्त्तव्यः कामिनीनां सुखावहः" कामशास्त्रम् ।

**दन्ताद** पु० "केशरोमनखादाश्च दन्तादाः चिक्किशास्तथा । कुष्ठजाश्च परीसर्पाज्ञेयाः शोणितसम्भवाः" सुश्रुतोक्ते दन्तखादकक्रिमिरोगभेदे । "दन्तादानां समुद्दिष्टं विधानं मुखरोगिणाम्" सुश्रु० ।

**दन्तादन्ति** त्रि० दन्तैश्च दन्तैश्च प्रहृत्य प्रवृत्तं युद्धम् इच् समा० पूर्वाणोदीर्घः । परस्परदन्तप्रहारेण प्रवृत्ते युद्धे "कचाकचि युद्धमासीद्दन्तादन्ति नखानखि" भा० कर्ण० ४९ अ० । [जातित्वात् ङीष् ।

**दन्तायुध** पुंस्त्री०दन्ता युधमिवास्य । शूकरे त्रिका० स्त्रियां

**दन्तार्बुद** पु० दन्तस्यार्बुदमिव । दन्तरोगभेदे राजनि० ।

**दन्तालिका** स्त्री दन्तान् अलति भूषयति, तेभ्यो वा पर्य्याप्नोति अल+ण्वुल् । वल्गायाम् । (लागाम) त्रिका० । "दन्तालिकाधरणनिश्चलपाणियुग्मम्" । (वल्गपालम्) माघः। अण् गौ०ङीष् दन्ताली तत्रार्थे वैजय० । [अमरः ।

**दन्तावल** पु० दन्त+अस्त्यर्थे वलच् पूर्वपददीर्घः । हस्तिनि

**दन्तिका** स्त्री दम–तन्+गौरा० ङीष् स्वार्थे क ह्रस्वः । दन्तीवृक्षे अमरः ।

**दन्तिजा** स्त्री दन्तिका+पृषो० । दन्त्योषधौ शब्दर० ।

**दन्तिन्** पु० दन्त+अस्त्यर्थे इनि । हस्तिनि अमरः "अनिर्वाणस्य दन्तिनः" रघुः । "पिष्टाद्रिपृष्ठास्तरसा च दन्तिनः" माघः । [दन्तीवृक्षे राजनि० ।

**दन्तिनी** स्त्री दन्तस्तदाकारोऽस्त्यस्याः मूले इनि ङीप् ।

**दन्तिमद** ६त० । हस्तिमदे गन्धद्रव्यभेदे शब्दार्थचि० ।

**दन्तिमूलिका** स्त्री दन्ति गजदन्तयुक्तमिव मूलमस्याः कप् कापि अत इत्त्वम् । दन्तीवृक्षे राजनि० ।

**दन्ती** स्त्री दम–तन् गौरा०ङीष् । १उदुम्बरपर्ण्यां, प्रत्यक्पर्ण्यामोषधौ अमरः । दन्तः गजदन्त इव मूलमस्त्यस्याः अच् गौरा०ङीष् ।२स्वनामख्याते वृक्षे भावप्र० "लघुदीर्घप्रभेदेन प्रोक्तं दन्तीद्वयं बुधैः। दन्तीद्वयं सरं पाके रसे च कटु दीपनम् । गुदाङ्कुराश्मशूलास्रकण्डुकुष्ठविदाहनुत् । तीक्ष्णोष्णं हन्ति पित्तास्रकफशोथोदरक्रिमीन्" भावप्र० तद्गुणा उक्ताः ।

**दन्तीवीज** न० दन्त्या इव वीजमस्य । जयपाले राजनि० ।

**दन्तुर** त्रि० उन्नताः दन्ताः सन्त्यस्य दन्त+उरच् । १उन्नतदन्तयुक्ते, उन्नतानते विषमे स्थाने च शब्दार्थचि० । "शूकरे निहते चैव दन्तुरो जायते नरः" शाता० तथाभवनसाधनं कर्मविशेष उक्तः। "कदाचिद्दन्तुरो मूर्खः कदाचिल्लोमशः सुखी । कदाचित् तुन्दिलो दुःखी कदाचिच्चञ्चला सतीति" बाहुद्रकम् । "अमलमणिशलाकादन्तुराभिः किरीटकोटिभिः" काद० । "करयन्त्रणदन्तुरान्तरे" नैष० ।

**दन्तुरक** पु० देशभेदे स च देशः वृ० स० १४ अ० कूर्म्मविभागे अथ पूर्वस्यामित्युपक्रमे "मिथिलसमभटोड्राश्ववदनदन्तुरकाः" । पूर्वस्यामुक्तः । [राजनि० ।

**दन्तुरच्छद** पु० दन्तुर उन्नतानतः छदो यस्य । वीजपूरे

**दन्तोलूखलिक** पु० दन्ता एव उलूखलः कण्डनसाधनं विद्यतेऽस्य ठन् । वानप्रस्थभेदे स हि दन्तैरेव शीस्यादीन् कण्डयित्वा खादति । "दन्तोलूखलिकः कालपक्वाशी